# Shri Kantheshastutih

# શ્રીકણ્ઠેશસ્તુતિઃ

## Document Information

Text title : kaNTheshastutiH

File name : kaNTheshastutiH.itx

Category : shiva, sachchidAnanda-shivAbhinava-nRisiMhabhAratI

Location : doc_shiva

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : November 9, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

August 30, 2023

*sanskritdocuments.org*

# Shri Kantheshastutih

# શ્રીકણ્ઠેશસ્તુતિઃ

(શિષ્યાશીર્વચનાત્મકસ્તવાઃ)

શ્રીશામ્ભોજભવાદિમામરગણપ્રસ્તૂયમાનાગજા-
ચિત્તામ્ભોરુહબાલવાસરપતે કારુણ્યવારાન્નિધે ।
શ્રીવિદ્યાપ્રદપાદપઙ્કજસકૃત્પ્રાણમ્રલોકાલયે
શ્રીકણ્ઠેશ મહાપ્રભોઽવ સસુતં શ્રીચામરાજપ્રભુમ્ ॥ ૧॥

પાપામ્ભોનિધિબાડવપ્રવિલસજ્જ્યોત્સ્નાભદેહચ્છવે
કાલાહઙ્કૃતિવારણવ્રતવિધિપ્રાવીણ્યભાક્શઙ્કર ।
પ્રાણાયામપરાયણૈર્મુનિવરૈઃ સઞ્ચિન્ત્યમૂર્તેઽનિશં
શ્રીકણ્ઠેશ મહાપ્રભોઽવ સસુતં શ્રીચામરાજપ્રભુમ્ ॥ ૨॥

શ્રીમચ્છઙ્કરદેશિકેન્દ્રરચિતવ્યાખ્યાનસિંહાસના-
ધીશશ્રીનરસિંહભારતિકરામ્ભોજાર્ચિતાઙ્ઘ્રિદ્વય ।
શ્રીવાણીપરિસેવિતાગતનયાસંશોભિતાઙ્કસ્થલ
શ્રીકણ્ઠેશ મહાપ્રભોઽવ સસુતં શ્રીચામરાજપ્રભુમ્ ॥ ૩॥

હસ્ત્યશ્વાદિસમસ્તમઙ્ગનિવહં પ્રાપય્ય વૃદ્ધિં પરાં
હસ્તીન્દ્રાનનકાર્તિકેયવિલસત્પાર્શ્વદ્વય પ્રેમતઃ ।
દારામાત્યસુમિત્રબન્ધુસહિતં શ્રીકૃષ્ણરાજાત્મજં
શ્રીકણ્ઠેશ મહાપ્રભોઽવ સસુતં શ્રીચામરાજપ્રભુમ્ ॥ ૪॥

વિદ્યાવૃદ્ધિકૃતે સભા બહુવિધા નિર્માય તત્રાગ્રિમં
દત્ત્વા વેતનમાદરાત્સુવિદુષઃ સંસ્થાપ્ય દેશે સ્વકે ।
અધ્યેતૄન્ પરિપોષયન્તમનિશં દત્ત્વાશનાચ્છાદને
શ્રીકણ્ઠેશ મહાપ્રભોઽવ સસુતં શ્રીચામરાજપ્રભુમ્ ॥ ૫॥

ગૌરીનાથરમાધવાઙ્ઘ્રિસરસીસઞ્જાતશૃઙ્ગાયિત-
સ્વાન્તં મન્મથગર્વહારિવપુષં કારુણ્યરત્નાકરમ્ ।

દેવબ્રાહ્મણભક્તિજન્મસદનં વાણીવિલાસાશ્રયં
શ્રીકણ્ઠેશ મહાપ્રભોઽવ સસુતં શ્રીચામરાજપ્રભુમ્ ॥ ૬॥

ઇતિ શ‍ૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
ભારતીસ્વામિભિઃ વિરચિતા શ્રીકણ્ઠેશસ્તુતિઃ સમાપ્તા ।

Proofread by PSA Easwaran

---

*Shri Kantheshastutih*
pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*